1

श्रीगणेशाय नमः ॥ धरण्युवाच ॥ देवदेव कृपासिन्धो कृपयानुग्रहान्मयि ॥ श्रीसी
ताकवचं दिव्यं सर्वपापभयापहम् ॥१॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि
गुह्याद्गुह्यमनुत्तमम् ॥ सीतायाः कवचं पुण्यं पठतां पापनाशनम् ॥२॥ ध्यात्वा त
प्तकदामाभां कोमलांघ्रिसरोरुहाम् ॥ बालातपाभवसनां करभप्रतिमोरुकाम्
॥१॥ ॥३॥ पूर्णचन्द्राभवदनां नीलकुञ्चितकुन्तलाम् ॥ मणिकंकणसौन्दर्यविलस ॥१॥
त्करपल्लवाम् ॥४॥ सर्वसद्गुणसंपूर्णां हेमकुंभलसत्कुचाम् ॥ आजानुवि
न्यस्तभुजां करपद्मधृताम्बुजाम् ॥५॥ किरीटहारकेयूरमणिभूषणभूषिता
म् ॥ रत्नसिंहासनगतां देवगन्धर्वसेविताम् ॥६॥ श्रीरामवामभागस्थां न
व चामीकरप्रभाम् ॥ सीतायाः कवचं पुण्यं पठेत्पापप्रणाशनम् ॥७॥ श्रीसी

प्रातः पठेन्नरः ॥१६॥ तस्य भक्तिः समृद्धिः स्यादायुः कीर्त्तिश्च वर्द्धते ॥ राक्षस
नां भयं नास्ति सदा सीतास्मरणपरवान् ॥१७॥ अनुरागारविन्दचरणां सम्मुखसन्तु
णार्कविम्बकमनीयकुराङ्गनाम् ॥ वन्दनाजनपस्यतनयामुपास्महे कञ्जला
भिधेय विमलोत्पलेक्षणाम् ॥१८॥ इति श्रीब्रह्माण्डपुराणे घटश्रोत्रि
॥२॥ यसंवादे श्रीसीताकवचं समाप्तं संपूर्णं शुभमस्तु शुभं भूयात् ॥ ॥२॥

ताकवचस्यास्यशेष ऋषिरुदाहृतः ॥ प्रोक्तमनुष्टुप् छन्दो देवता जनकात्मजा ॥८॥ मू
सीता रक्षतु मूर्द्धानं नयने जानकी मम ॥ श्रीरामचन्द्रवनिता कपोलौ पातु सर्वदा ॥९॥
कण्ठं मे पातु वैदेही हृदयं राघवप्रिया ॥ करौ विदेहतनया पार्श्वं भूमिसुता मम ॥१०॥
उदरं पातु कौशिल्यानन्दनप्रेयसी सदा । ऊरू रक्षतु वैदेही जानुनी जनकोद्भवा ॥११॥
पादौ रक्षतु मे नित्यं रामपत्नी दृढव्रता । देवी पातु च सर्वाङ्गं मम पंकजलोचना ॥१२॥
दैत्यदानवभूतेभ्यः पातु मां राघवप्रिया । राजरोगभयेभ्यो मां पातु पंकजधारिणी ॥१३॥ अ
प्रपाणकाले सीतायाः पः पठेत्कवचं परम् । मुच्यते सर्वपापेभ्यो निर्वाणमधिगच्छ
ति ॥१४॥ अश्वमेधायुतं पुण्यं पठनाल्लभते नरः । नित्यं पठति भक्त्या पत्तस्य सीता
प्रसीदति ॥१५॥ राज्यलाभो भवेत्तस्य रामभक्तिश्च पुष्कला ॥ इदं पः कवचं गुह्यं सा